# 11 - एकादश दशकम्

## सनकादीनां वैकुण्ठ दर्शनम्

क्रमेण सर्गे परिवर्धमाने कदापि दिव्यास् सनकादयस्ते ।
भवत् विलोकाय विकुण्ठलोकं प्रपेदिरे मारुत मन्दिरेश ॥ ॥11-1॥

मनोज्ञ नै श्रेयस कान नाद्यैः अनेक वापी मणि मन्दिरैश्च ।
अनोपमं तं भवतो निकेतं मुनीश्वराः प्रापु रतीत कक्ष्याः ॥ ॥11-2॥

भवद् दिदृक्षून् भवनं विविक्षून् द्वाःस्थौ जयस्तान् विजयोऽप्यरुन्धाम्।
तेषां च चित्ते पदमाप कोपः सर्वं भवत् प्रेरणयैव भूमन् ॥ ॥11-3॥

वैकुण्ठ लोका नुचित प्रचेष्टौ कष्टौ युवां दैत्यगतिं भजेतम् ।
इति प्रशप्तौ भवदाश्रयौ तौ हरि स्मृतिर्नोऽस्त्विति नेमतुस्तान् ॥ ॥11-4॥

तदेत दाज्ञाय भवा नवाप्तः सहैव लक्ष्म्या बहि रम्बुजाक्ष ।
खगेश्वरं सार्पित चारु बाहुः आनन्दयन्स्ता नभिराम मूर्त्या ॥ ॥11-5॥

प्रसाद्य गीर्भिस् स्तुवतो मुनीन्द्रान् अनन्य नाथौ अथ पार्षदौ तौ ।
संरम्भ योगेन भवैस् त्रिभिर् माम् उपेत मित्यात्त कृपं न्यगादीः ॥11-6॥

त्वदीय भृत्या-वथ काश्यपात्-तौ सुरारि वीरौ उदितौ दितौ द्वौ ।
सन्ध्या समुत्पादन कष्ट चेष्टौ यमौ च लोकस्य यमावि-वान्यौ ॥11-7॥

हिरण्यपूर्वः कशिपुः किलैकः परो हिरण्याक्ष इति प्रतीतः ।
उभौ भवन्नाथ मशेष लोकं रुषा न्यरुन्धां निजवास नान्धौ ॥॥11-8॥

तयोर् हिरण्याक्ष महासुरेन्द्रः रणाय धावन् ननवाप्त वैरी ।
भवत्प्रियां क्ष्मां सलिले निमज्य चचार गर्वा द्विनदन् गदावान् ॥11-9॥

ततो जलेशात् सदृशं भवन्तं निशम्य बभ्राम गवेषयंस् त्वाम् ।
भक्तैक दृश्यस् स कृपानिधे त्वं निरुन्धि रोगान् मरुदालयेश ॥11-10॥

STOTRADHWANI

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥

॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नमः॥